नं०: १६४—
पाणिनीय शिक्षा चतुष्टय
पत्राणि १८
पाणिनिशिक्षा
१८४
ग

१८ पत्राणि

ॐ नीलकंठ शुभगात्री वसर्वकर्म शुभप्रदः। पार्वतीयामवतीरं। सिद्धंजरीदनमो ऽस्तुते॥ १ शुभमस्तु॥

समारम्भः



विरूपा चतुर्दश

ॐ स्वस्ति श्रीगणेशाय नमः ॥ ॥ अथ शिक्षां प्रवक्ष्यामि पाणिनीयं मतं यथा । शास्त्रानुपूर्वं तद्विद्याद्यथोक्तं लोकवेदयोः ॥ १ ॥ प्रसिद्धम
पि शब्दार्थमविज्ञातमबुद्धिभिः । पुनर्व्यक्तीकरिष्यामि वाच उच्चारणे विधिम् ॥ २ ॥ त्रिषष्टिश्चतुःषष्टिर्वा वर्णाः शंभुमते मताः । प्राकृते
संस्कृते चापि स्वयं प्रोक्ताः स्वयंभुवा ॥ ३ ॥ स्वरा विंशतिरेकश्च स्पर्शानां पञ्चविंशतिः । यादयश्च स्मृता ह्यष्टौ चत्वारश्च यमाः स्मृताः ॥
॥ ४ ॥ अनुस्वारो विसर्गश्च ꣵकꣵपौ चापि पराश्रयौ । दुःस्पृष्टश्चेति विज्ञेयो ऌकारः प्लुत एव च ॥ ५ ॥ यथा सौराष्ट्रिका नारी अराँ इत्यभि
भाषते । एवं रङ्गं विजानीयात्खे अराँ इव खेदया ॥ ६ ॥ हकारं पञ्चमैर्युक्तमन्तस्थाभिश्च संयुतम् । औरसं तं विजानीयात्कण्ठ्य
माहुरसंयुतम् ॥ ७ ॥ आत्मा बुद्ध्या समेत्यार्थान्मनो युङ्क्ते विवक्षया । मनः कायाग्निमाहन्ति स प्रेरयति मारुतम् ॥ ८ ॥ मारुत
स्तूरसि चरन्मन्द्रं जनयति स्वरम् । प्रातःसवनयोगं तं छन्दो गायत्रमाश्रितम् ॥ ९ ॥ कण्ठे माध्यन्दिनयुगं मध्यमं त्रैष्टुभानुगम् ॥
तारं तार्तीयसवनं शीर्षण्यं जागतानुगम् ॥ १० ॥ सोदीर्णो मूर्ध्न्यभिहतो वक्त्रमापद्य मारुतः । वर्णाञ्जनयते तेषां विभागः प रामः १
ञ्चधा स्मृतः ॥ ११ ॥ स्वरतः कालतः स्थानात्प्रयत्नानुप्रदानतः । इति वर्णविदः प्राहुर्निपुणं तं निबोधत ॥ १२ ॥ अष्टौ स्था

नादिनं वर्णं नाभुरः कण्ठः शिरस्तथा। जिह्वामूलञ्च दन्ताश्च नासिकौष्ठौ च तालु च॥१३॥ उदात्ते निषादगान्धारावनुदात्त ऋषभधैव
तौ। स्वरितः प्रभवा ह्येते षड्जपञ्चममध्यमाः॥१४॥ ऊँ भावश्च विवृत्तिश्च शषसा रेफ एव च। जिह्वामूलमुपध्मा च गतिरष्टविधो
ष्मणः॥१५॥ यद्योभावप्रसन्धानमुकारादि परं पदम्। स्वरान्तं तादृशं विद्याद्यदन्यद्व्यक्तमूष्मणः॥१६॥ कुतीर्थादागतं दग्धमप
वर्णं च भक्षितम्। न तस्य पाठे मोक्षोऽस्ति पापाहेरिव किल्बिषात्॥१७॥ सुतीर्थादागतं व्यक्तं स्वाम्नायं सुव्यवस्थितम्। सुस्वरेण सुव
क्त्रेण प्रयुक्तं ब्रह्म राजति॥१८॥ न करालो न लम्बोष्ठो नाव्यक्तो नानुनासिकः। गद्गदो बद्धजिह्वश्च प्रयोगान्वक्तुमर्हति॥१९॥ य
था व्याघ्री हरेत्पुत्रान्दंष्ट्राभिर्न च पीडयेत्। भीता पतनभेदाभ्यां तद्वद्वर्णान्प्रयोजयेत्॥२०॥ एवं वर्णाः प्रयोक्तव्या नाव्यक्ता न च पी
डिताः। सम्यग्वर्णप्रयोगेण ब्रह्मलोके महीयते॥२१॥ अभ्यासार्थे द्रुतां वृत्तिं प्रयोगार्थे तु मध्यमाम्। शिष्याणामुपदेशार्थं कु
र्याद्वृत्तिं विलम्बिताम्॥२२॥ गीती शीघ्री शिरःकम्पी यथा लिखितपाठकः। अनर्थज्ञोऽल्पकण्ठश्च षडेते पाठकाधमाः॥२३॥
माधुरीमक्षरव्यक्तिः पदच्छेदस्तु सुस्वरः। धैर्यं लयसमर्थं च षडेते पाठका गुणाः॥२४॥ उदात्तश्चानुदात्तश्च स्वरितश्च स्वरा

स्वरधः॥ ह्रस्वो दीर्घः प्लुत इति कालतो नियमा अचि॥२५॥ कण्ठ्यावहाविचुयशास्तालव्या ओष्ठजावुपू। स्युर्मूर्धन्या ऋटुरषा दन्त्या
लृतुलसाः स्मृताः॥२६॥ जिह्वामूले तु कुः प्रोक्तो दन्त्योष्ठ्यो वः स्मृतो बुधैः॥ ए ऐ तु कण्ठतालव्या ओ औ कण्ठोष्ठजौ स्मृतौ॥
॥२७॥ अर्धमात्रा तु कण्ठ्यस्य एकारैकारयोर्भवेत्। इकारोकारयोर्मध्ये ए ऐ विवृतसंवृतौ॥२८॥ उपध्मानीय ऊष्मा
य जिह्वामूलीयनासिके। अयोगवाहा विज्ञेया आश्रयस्थानभागिनः॥२९॥ अलाबुवीणानिर्घोषो दन्तमूल्यः स्वरा
नुगः। अनुस्वारस्तु कर्तव्यो नित्यं ह्रोः शषसेषु च॥३०॥ ऊष्मणां च स्वराणां च विवृतं करणं स्मृतम्। तेभ्योऽपि विवृता
वेतौ ताभ्यामैचौ तथैव च॥३१॥ अचोस्पृष्टा यणस्त्वीषन्नेमस्पृष्टाः शलः स्मृताः। शेषाः स्पृष्टा हलः प्रोक्ता निबोधा
नुप्रदानतः॥३२॥ यमोऽनुनासिका न ह्रौ नादिनो हझषः स्मृताः। ईषन्नादा यणो जशः श्वासिनस्तु खफादयः॥३३॥ ई
षच्छ्वासांश्चरो विद्याद्गोर्धामैतत्प्रचक्षते। शङ्करः शाङ्करीं प्रादाद्दाक्षीपुत्राय धीमते॥३४॥ दाक्षीपुत्रः पाणिनेयो येने
दं व्याहृतं भुवि॥ रत्नभूतमिदं शास्त्रं पृथिव्यां संप्रकाशितम्॥३५॥ येनाक्षरसमाम्नायमधिगम्य महेश्वरात्। कृत्स्नं

याकरणं प्रोक्तं तस्मै पाणिनये नमः ॥३६॥ त्रिनयनमुखनिःसृतामिमां यइह पठेत्प्रयतः सदा द्विजः । स भवति धनधान्यपशु
पुत्रकीर्तिमानक्षुखमतुलञ्च समश्नुते दिवीतिदिवीति ॥३७॥ ॥ इति शिक्षाध्यायः समाप्तः प्रथमोध्यायः ॥१॥ ॥ पञ्चसम्वत्स
रमयं युगाध्यक्षं प्रजापतिम् । दिनर्त्वयनमासाङ्गं प्रणम्य शिरसा शुचिः ॥१॥ ज्योतिषामयनं पुण्यं प्रवक्ष्याम्यनुपूर्वशः ॥
सम्मतं ब्राह्मणेन्द्राणां यज्ञकालार्थसिद्धये ॥२॥ वेदा हि यज्ञार्थमभिप्रवृत्ताः कालानुपूर्व्या विहिताश्च यज्ञाः । तस्मादिदं
कालविधानशास्त्रं यो ज्योतिषं वेद स वेद यज्ञम् ॥३॥ यथा शिखा मयूराणां नागानां मणयो यथा । तद्वद्वेदाङ्गशास्त्रा
णां गणितं मूर्धनि स्थितम् ॥४॥ यद्बृहस्पतिनाभुक्तं मीनात्प्रभृति राशयः । त्रिंशताः पञ्चभिर्भुक्ताः तावः षाष्ठः सपरिग्रहः ॥
॥५॥ माघशुक्लप्रपन्नस्य पौषकृष्णसमापिनः । युगस्य पञ्चवर्षस्य कालज्ञानं प्रचक्षते ॥६॥ स्वराक्रमेते सोमार्कौ यदा
साकं सवासवौ । स्यात्तदादियुगं माघः तपः शुक्लोऽयनं ह्युदक् ॥७॥ प्रपद्येते श्रविष्ठादौ सूर्याचन्द्रमसावुदक् । सार्पा
र्धे दक्षिणार्कस्तु माघश्रावणयोः सदा ॥८॥ घर्मवृद्धिरपां प्रस्थः क्षपाह्रास उदग्गतौ । दक्षिणे तौ विपर्यासः षण्मुहू

स्येयनेन तु ॥९॥ प्रथमं सप्तमं याङ्क वयनाद्यं त्रयोदशाम्। चतुर्थं दशमं चैव द्वितीयमाद्यं षड्ङ्लेभ्यतो ॥१०॥ वसुस्त्वष्टाभगोज
श्चमित्रः सर्पाश्विनौ जलम्। धाता कश्चायनाद्याः स्युरर्धपञ्चभभस्त्वतुः ॥११॥ एकोनत्रिंशद्भमा सेव सर्वाद्यन्त्वादि कृन्नरः।
अर्धयाः पञ्चपर्वाणाम् ऋद्धपञ्चदशाश्च भौ ॥१२॥ दुहे घंपर्वकेत्यादेः पादविंशान्तु सैकिका। भागात्मना पञ्चज्याशां निर्दि
ष्टायं शेषाधिको यदि ॥१३॥ मिश्रकं द्वादशाभ्यस्तं द्विगुणं वयसंयुतम्। षष्ट्याषष्ट्यायुतं द्वाभ्यां पर्वणां साधिकं भवेत् ॥१४॥ अ
3 स्युः पादोर्ध्वं त्रिपाद्यायां त्रिघ्नेकेन्द्रोणते स्थितिः। साम्यनन्दो द्वित्रानेषु पंचकाः पर्वसम्मिताः ॥१५॥ भांशास्युरष्टकाः षट्का यो
पञ्चद्वादशकोन्नताः ॥ एकादशगुणोऽश्वानः शक्रार्धवेदवा यदि ॥१६॥ नवकेकृन्तोंशाः स्याद्भूनः सपूर्णतो भवेत्। त्रा
वाधस्त्वद्युजेर्धं स्यात्सोलक्तपसंगते परम् ॥१७॥ जाम्बाद्यं यौ समं विद्यात् सूर्वार्धं पर्वसन्तराषु। आदानं स्याच्चतुर्दशपा द्वि याम: ३
भागाभ्या धिको यदि ॥१८॥ ओङ्कागः खाश्यही रोधाविमूष एषः समाधाणः। देमगाम्बापाजः होघ्य हक्षोष्ठा दूष्यन्दा हि
डैः। कार्ष्टो भांशाष्टका स्थानेक लापका न्नविंशातिः। ऊनस्थाने द्विसप्ताप्ति सुद्धपद्युक्तसंभवेत् ॥१९॥ तिथिमेकादश

भक्तां पर्वभां प्राप्तसमन्विताम्। विभज्य भसमूहेन तिथिनक्षत्रभागदैर्घ्येन। या पर्वभादानकला स्युस्तत्र गुणां तिथिम्। उक्ता
स्तासां कियानी यात्तिथिभादानिकाः कलाः॥ अतीतपर्वभात्सभ्यः प्राप्तये द्विगुणां तिथिम्॥ ४॥ तेषु मण्डलभागेषु तिथिनि
घ्नां गतो रविः। विषुवन्तं द्विरभ्यस्तं रूपोनं षड्गुणीकृतम्। पक्षाद्यदर्धपक्षाणां तिथिः स विषुवान्स्मृतः॥ पलानि पंचाशदष्टा
पंचाशता नितदा ८ कं द्रोणमानः प्रमेयम्। त्रिभिर्विहीनं कुटवैस्तु का घतं नाडिका यास्तु भवेत्प्रमाणम्॥ एकादशाभिरभ्य
स्य पर्वाणि नवभिस्तिथिम्। युगलब्धं सपर्वं स्याद्वर्तमानार्कभक्तमात्॥ ५॥ सूर्यर्क्षभागान्नवभिर्विभज्य शेषं द्विरभ्यस्य दि
नोपभुक्तिः॥ तिथिषु ताभुक्तिदिनेषु कालो ग्रासांधिनैकादशाके नताड्नम्। यं शीभवो घादिवसांशभागश्चतुर्दशघ्नात्प्य
घनीयभिन्नम्। भार्धेऽधिके वा पततोऽठ परं पदा वात्तमतं नदके रवेदुः॥ उंत्रापद्रौ सघट् षष्टिरब्दुः षड्गुणितेवोदयेन। म
साद्वादशास्तथास्तु रेतस्य स्वगुणं युगम्। उदयावासवस्यस्तु दिनराशिस्व पश्चकः। रूपे द्विषष्टिहीनं स्याद्विं शत्यावे
कयास्त्रणाम्। पञ्चविंशांशतं शातं पोष्ठे सकोनमयनाप्योवः। पर्वाणां स्यात्स्वयं घ्यादिकाष्टानां दैविकाः कलाः। सावन

दु स्वेमासानां षष्ठिश्चैकाद्विसप्तिकाः ॥ द्वित्रिंशात्सावनः सार्धः सूर्यस्त्रीणां सपर्ययः ॥ ५ ॥ अग्निः प्रजापतिः सोमो रुद्रो दि
तिर्बृहस्पतिः । सर्पाश्च पितरश्चैव भगश्चैवार्यमापि च ॥ सविता त्वष्टाथ वायुश्चेन्द्राग्नी मित्र एव च । इन्द्रो निरृतिरापो विश्वे
देवास्तथैव च । विष्णुर्वसवो वरुणो जएकपात्तथैव च ॥ अहिर्बुध्न्यस्तथा पूषा अश्विनौ यम एव च । नक्षत्रदेवता ह्येता
एताभिर्यज्ञकर्मणि । यजमानस्य शास्त्रज्ञैर्नाम नक्षत्रजं स्मृतम् ॥ उग्राण्यार्द्रा च चित्रा च विशाखा श्रवणोऽश्वयुक् । क्रूराणि
तु मघा स्वातिर्ज्येष्ठा मूलं यमस्य यत् ॥ ८ ॥ द्युनं द्विघ्नं षिभागेनहृद्यं सोर्याः सपार्वणः । यत्कृतावुपजायेते मध्येन्त्ये
चाधिमासकौ । कला दश सविंशा स्याद्द्विमुहूर्तस्य नाडिके । द्वित्रिंशात्कलानां तु षट्शती त्र्यधिकं भवेत् । ससप्तकं
भयुक्सोमः सूर्यो द्युनि त्रयोदश । उत्तमानि तु पञ्चाह्नः काष्ठा पञ्चाक्षरा भवेत् ॥ यदुत्तरस्यायनतोगतं स्याच्छेषं तथा
दक्षिणतायनस्य । तदेव षष्ट्या द्विगुणं विभक्तं सद्वादशं स्याद्दिवसप्रमाणम् ॥ यदर्धं दिनभागानां सदा पर्वणि पर्वणि ।
ऋतुशेषं तु तद्विद्यात्संख्याय सह पर्वणाम् ॥ इत्युपायसमुद्देशो भूयोऽप्यह्नः प्रकल्पयेत् ॥ ज्ञेयराशिं गताभ्यस्तां वि

गण: ४

भवेद्ब्राह्मणराशिनामा। कृत्वैवं मासवर्षाणां मुहूर्तोदयपर्वणाम्। दिनर्त्वयनमासाङ्ग·व्याख्यानं लगतोब्रवीत्॥ सोमसूर्याग्निवृ
त्तिं विद्वान्वेदविदश्नुते। सोमसूर्याग्निवर्तिलोकं लोकं च सन्ततं लोकं लोकं च सन्ततमिति॥ ८ ॥ ७ ॥ ॥ इति ज्योतिषं
समाप्तं द्वितीयोध्यायः॥ २॥ ॥ मयरसतजभनगा लसंमितं भ्रमति वाङ्मयं जगति यस्य। स जयति पिङ्ग·लनागः शिव
प्रसादाद्विशुद्धमतिः॥ १॥ त्रिगुरुं विद्धि मकारं लघ्वादिं समन्वितं यकारमाख्यातम्। लघुमध्यमं च रेफं सकारमन्त्यगु
रुं निबद्धम्॥ २॥ लघु त्रिकं हि नकारं गुरुत्रयाल्लघुं विजानीयात्। आदिगुरुं च भकारं नकारमिह पिङ्ग·लेत्रिलघुम॥ ३॥ दी
र्घं संयोगपरं तथा प्लुतं व्यञ्जनान्तमूष्माणम्। सानुस्वारं च गुरुं क्वचिदवसानेपि लघ्वन्त्यम्॥ ४॥ त्रिविरामं दश
वर्णं पद्मात्रमुवाच पिङ्ग·लः सूत्रम्। छन्दोवर्गपदार्थप्रत्ययहेतोश्च शास्त्रादौ॥ ५॥ धीश्रीस्त्रीम्। वरासयू। का
गुहाय। वसुधाम। साधयकुलम्। कदासज। किंवदभ। नहसन। गजल। धेनो। भ्रादिपरंभह। लोमः। गौ। श्रीवो
मवहृतो॥ २॥ छन्दः। गायत्री। दैव्येकम्। आसुरी पञ्चदश। प्राजापत्याष्टौ। यजुषांषट्। साम्नांद्विः। ऋचांत्रिः। द्वौ

५ जंकार ४
४ स्वर ७
गर
तेर
तद्र

३ग

दै॰साम्नां वर्धेत। त्रींस्त्रीनृचाम्। चतुरश्चतुरः प्राजापत्यायाः। एकैकं ब्राह्मे। जह्यादासुरी। तान्युष्णिगनुष्टुब्बृहतीपङ्क्ति-
त्रिष्टुब्जगत्यः॥ तिस्रस्तिस्रः समानाम्न एकैकावाह्म्याः। प्राग्यजुषामार्च्य इति॥ २॥ पादः। इत्यादिपूरणैः। गायत्र्या व-
सवः। जगत्या आदित्याः। विराजो दिशः। त्रिष्टुभो रुद्राः। एकद्वित्रिचतुष्पात् पादम्। आद्यं चतुष्पादृतुभिः। ककुप्त्रि-
पाद्विभिः। सा पादनिचृत्। अष्टौ गन्ने षड्वतिप्रतिष्ठा। एषैव विपरीता वर्धमाना। षट्सप्तकयोर्मध्य इत्यतिपाद-
निचृत्। द्वौ नवकौ षट्कश्च मानामी। विपरीतो वाराही। तृतीयं द्विपाज्जागतगायत्राभ्याम्। त्रिपात्त्रैष्टुभैः। उष्णिगाय-
त्राजागतैश्च। ककुम्मध्ये चेदन्त्यः। पुरउष्णिक् पुरतः। परोष्णिक् परतः। चतुष्पादृतुभिः। अनुष्टुब्गायत्रैः। त्रिपात्कृति-
5 जागताभ्यां च। मध्येऽन्ते च। बृहती जागतस्त्रयश्च गायत्राः। पथ्या पूर्वश्चेत्तृतीयः। न्यङ्कुसारिणी द्वितीयः। स्कन्धोग्रीवी साम: ५
क्रौष्टुकेः। उरोबृहती यास्कस्य। उपरिष्टाद्बृहत्यन्ते। पुरस्ताद्बृहती पुरः। कुविन्नेकाश्चत्वारः। वैराजो गायत्रोऽश्च।
त्रिभिर्जागतैर्महाबृहती। सतोबृहती ताण्डिनः। पंक्तिर्जागतौ गायत्रौ च। पूर्वौ चेद्युजौ सतःपङ्क्तिः। विपरीतौ च

प्रस्तारपङ्क्तिः पुरतः। आस्तारपङ्क्तिः पश्चात्। विस्तारपङ्क्तिः मध्यतः। संस्तारपङ्क्तिः बहिः। अक्षरपङ्क्तिः पञ्चकाश्चत्वारः। द्वा
वप्यल्पशः। पदपङ्क्तिः पञ्च। चतुष्कषट्कौ त्रयश्च। पथ्या पञ्चभिर्गायत्री। जगती षड्भिः। एकेन त्रिष्टुब्ज्योतिष्मती। तथा
जगती। पुरस्ताज्ज्योतिः प्रथमेन। मध्येज्योतिर्मध्यमेन। उपरिष्टाज्ज्योतिरन्त्येन। एकस्मिन्पञ्चके छन्दः शङ्कुमती। ष
२४ ट्के ककुमती। त्रिपादणिष्ठमध्या पिपीलिकमध्या। विपरीता यवमध्या। ऊनाधिकेनैकेन निचृद्भुरिजौ। द्वाभ्यां विराट्स्वा
राजौ। आदिसंदिग्धे देवतादितः। अ स सो बृ व इ वि इति देवताः। सि सा पि कृ नी लो गौ वर्णाः। षड्ग्रामपथे निस्वधा इति।
आदितः संदिग्धे देवतादितोऽग्निः सविता सोमो बृहस्पतिर्वरुण इन्द्रो विश्वेदेवाः। स्वराः षड्जादयः। षड्जऋषभगा
न्धारमध्यमपञ्चमधैवतनिषादाः स्वराः इति। सितसारङ्गपिशङ्गकृष्णनीललोहितगौरा वर्णाः। रोचनाभाः कात्य
यः। रूपाण्यन्यानि छन्दांसि। अग्निवेश्यकाश्यपगौतमाङ्गिरसभार्गवकौशिकवाशिष्ठानि मात्रा लोति॥ ०॥ [illegible]
यातमुत्कृतिः। चतुर चतुर अभ्यजेदुत्कृतेः। तान्यभिसंव्याप्रेभ्यः कृतिः अकृत्यादि। अन्यत्र हि शक्वरी जगत्यः। एवमक

नं२

कृ वैतालीयं नाम्ने वैशाम् । द्वितीयं द्वितीयमतिमतः ॥ अत्र लौकिकम् । आद्येषुभाषष्ठपदार्धम् । पादस्य तु भागग यथावृत्त समाप्ति

र्वा । लः समुद्रागणः । गोपोन्नमध्यादि लक्ष्य । स्वसार्धवार्यार्धम् । अत्रायुङ्न जू । षड हौज । त्रौवा । त्रौयं स्यादं द्वितीया द्वि ॥

सप्तमः प्रथमादिः । अत्ये पञ्चमः । पूर्वश्चल । त्रिषु गणेषु पादः । पथ्यादौव । विपुलान्यान्या । यपला द्वितीयव तुर्यो

ज्झ धजो । पूर्वमुखपूर्वा । जघनपूर्वतत्र । उभयोर्महाचपला । आद्यार्धसमागीतिः । अन्त्येनोपगीतिः । उद्गमेण

गीतिः । अर्धवसुगणेश्चार्यागीतिः । वैतालीद्विः स्वरात्र युक्पादेयुग्मसवौन्नेलाः । गोपुच्छदसीकम् । आपातलिकागौ

गू प्रोचपरोलाः युङ्न साकम् । षड्मामिश्रायुजि । पञ्चमेन पूर्वः साकं प्राच्यवृत्तिः । अयुक्तृतीयेनादीच्यवृत्तिः । आभ्यां यु

गपत्प्रवृत्तकम् । अयुक्चारुहासिनी । युगपरान्तिका । गन्तादिर्वसवो मात्रासमकं मूलनवमः । द्वादशपाश्च वानवासिका ।

विश्लोकः पञ्चमाष्टमौ । चित्रानवमश्च । परयुक्तेनोपचित्रा । प्रथमचतुर्थयोर्नपदी । एभिः पादाकुलकम् । गीत्यार्यालः

गश्चेत्तोम्या । लः पूर्वश्चेऽपातिः । प्लुतस्वाविपर्ययार्धौ । चूलिकाद्वेकान्नत्रिंशद्वादकत्रिंशद्वादन्तेग । सा गपे ननस मालौ

रामः

६

गुरु इति ॥५॥ इत्यर्धसमं विषमवृत्तम् । समं तावत्कात्स्न्येन । अर्धसमम् । विषमं च । रात्रप्त नम् । श्रुतिसमभानी । लिलिखा
णी । वितानमन्यत् । पादस्यानुष्टुब्वक्त्रं न प्रथमात्स्नौ । वान्यत् । यनुर्थात् । पथ्यायुजो जः । विपरीतैकीयम् । चपला युजो
जोन्त्रा । विपुला युग्लसप्तमः । सर्वतः सैतवस्य । भ्रौ न्तौ च । प्रतिपादं चतुर्वृद्ध्या पदचतुरूर्ध्वम् । गावन्तः आपीडः । आद्येव
प्रत्यापीडः । प्रत्यापीडो गावादौ च । प्रथमस्य विपर्यासे मञ्जरीलवल्यमृतधाराः । उद्गतामेकतः सजौ सलौ न्सो जो भ्गौ
ङ्लौ ग् स्जौ स्जौ ग् तृतीयस्य सौरभके नौ भ्गौ । ललितं नास्नौ । उपस्थितप्रचुपितं प्रथमाद्यम्सौ ज्भौ गौ म्सौ ज्गौ गवा भ्सौ नौ
जौ । वर्धमानं नौ स्नौ स्नौ । शुद्धविराडृषभं तज्रः । अर्धे । उपस्थितकं सौ स्लौ ग् भौ भौ ग् । द्रुतमध्या भौ भौ ग् न्जौ ज्यौ वे
गवती सौ स्नौ भौ भौ ग् । भद्रविराट् तौ ज्गौ स्मौ स्लौ ग् । केतुमती स्जौ स्नौ भौ न्गौ ग् । आख्यानकी तौ जौ गौ ज्तौ जौ ग्गौ । विपरी
ताख्यानकी ज्तौ ज्गौ ग् तौ जौ ग् । हरिणप्लुता स्नौ स्लौ ग् न्भौ भ्रौ । अपरवक्त्रं नौ ल्गौ न्जौ ज्रौ । पुष्पिताग्रा नौ र्यौ न्जौ ज्रौ ग् । य
वमती रौ जौ जौ रौ जौ ग् । पादकं त्रिपादकं पादकैर् गू । इंजामहत्प्युजो ति ॥६॥ यति विच्छेदः । तनुमध्या त्यौ । कु

मारललिता ज्मौ ग्। चित्रपदा भौ गौ। विद्युन्माला मौ गौ। माणवका क्रीडितकं भ्तौ लौ। हलमुखी रौ नौ स्। भुजगशिशुसृता नौ म्। हं
सरुतं म्नौ गौ। शुद्धविराण्मसौ जौ। पणवो म्नौ य्गौ। मयूरसारिणी रजौ रगौ। मत्ता म्भौ स्गौ। उपस्थिता त्जौ जगौ। रुक्मवती
भ्मौ स्गौ। इन्द्रवज्रा तौ जौ ग्। उपेन्द्रवज्रा ज्तौ जौ ग्। आद्यन्तावुपजातयः। दोधकं भौ भौ ग्। शालिनी म्तौ तौ ग्। समु
द्रर्षयः। वातोर्मी म्भौ। नागचतुःस्वराः। भ्रमरविलसिता म्भौ नौ ग् समुद्रर्षयः। रथोद्धता रौ नौ लौ ग्। स्वागता रौ भौ ग्। वृन्ता
नौ सौ ग्। श्येनी रौ लौ ग्। जगती। वंशस्था ज्तौ ज्रौ। इन्द्रवंशा तौ ज्रौ। तोटकं सः। द्रुतविलम्बितं न्भौ भ्रौ। श्रीपुटो नौ म्याव
तुसमुद्राः। जलोद्धतगतिर्ज्सौ ज्सौ रसर्तवः। ततं नौ म्रौ। कुसुमविचित्रा न्यौ न्यौ। चञ्चलाक्षिका नौ रौ। भुजङ्गप्रयातं यः।
स्रग्विणी रः। प्रमिताक्षरा ज्सौ सौ। कान्तोत्पीडा भ्मौ स्मौ। वैश्वदेवी मौ यौ विड्डियर्षयः। नवमालिनी न्जौ भ्यौ विति॥ ७॥ रामः
प्रहर्षिणी म्नौ ज्रौ ग् त्रिकदशकौ। रुचिरा ज्भौ स्जौ ग् चतुष्कनवकौ। मत्तमयूरं म्तौ य्सौ ग् समुद्रनवकौ। गौरी नौ न्सौ ग्। ७
असम्बाधा म्तौ न्सौ गौ विड्डियनवकौ। अपराजिता नौ र्सौ लौ स्वरर्षयः। प्रहरणकलिता नौ भ्नौ लौ ग् द्विस्वराः। वसन्त

तिलकान्तौजौगौ। सिंहोन्नता काश्यपपमुपा। उद्धर्षिणी सैव तस्या। चन्द्रावर्त्ता नौ नौ स्तः। मालती नुगवकौ वेत्। मणिगुणनिकरो वस्व
षयः। मालिनी नौ म्यौ यू स्वषयः। ऋषभगजविलसितं भ्रौ नौ नौ गः स्वरनवकौ। शिखरिणी यौ न्सौ भ्लौ गः ऋतुरुद्राः। पृथ्वी
ज्सौ ज्सौ य्लौ गः वसुनवकौ। वंशपत्रपतितं भ्रौ न्भौ न्लौ गः दिगष्षयः। हरिणी न्सौ म्रौ स्लौ गः ऋतुसमुद्रऋषयः। मन्दाक्रा
न्ता म्भौ न्तौ ताग्गः समुद्रर्तुस्वराः। कुसुमितलतावेल्लिता म्तौ न्यौ यौ विद्विषदर्तुस्वराः। शार्दूलविक्रीडितं म्सौ ज्सौ तौ
दित्यर्षयः। इति· सुवदना म्रौ भ्नौ य्भौ ल्गौ ऋषिस्वरर्त्तवः। स्रग्धरा म्रौ भ्नौ यौ यौ त्रिः सप्तकाः। मद्रकं भ्रौ
न्रौ न्रौ न्गौ दिगादित्याः। अश्वललितं न्जौ भ्जौ भ्जौ भ्लौ गः रुद्रादित्याः। मत्ताक्रीडा म्तौ न्नौ न्नौ न्लौ गः वसुपञ्चदशकौ। तन्वी भ्तौ न्सौ भौ
न्यौ विद्विषस्वरमासाः। क्रौञ्चपदा भ्मौ स्भौ नौ नौ न्गौ तद्वियदवस्वषयः। भुजङ्गविजृम्भितं मौ तौ नौ न्सौ लौ वसुरुद्रर्षयः।
अपवाहकं म्नौ नौ नौ न्सौ गौ नवर्तुरसेन्द्रियाणि। दण्डकोनौ रः। प्रथमश्चण्डवृष्टिप्रयातः। अन्यत्र सप्त मात्रकवाम्भाप्र
चयः प्रचितक इति॥ ८॥ अथानुक्रमाख्या। द्विकौ ग्लौ। मिश्रौ च। पृथग्लामिश्रा वसवस्त्रिकाः। एकोनत्रक्रमशः। पूर्वप

कालसंख्या। अणुः लघ्वणुः हस्ता दण्डः क्रोशः। योजनमित्यध्वा। लब्धे। सैवागु। प्रतिलोममनुलोमं द्विलीयम्। ततो प्रत्येकं नवधा

त। द्विरर्धे। रूपे शून्यम्। द्विः शून्ये। तावदर्धे तद्गुणितम्। द्विद्व्यूनम्। तदन्तानाम्। परे पूर्णं परे पूर्णमिति॥ ८॥ ॥

॥ इतिछन्दःसमाम्नाये तीयोध्यायः॥ २॥ ॥ गौः। ग्मा। ज्मा। क्ष्मा। क्षा। क्षामा। क्षोणी। क्षितिः। अवनिः। उर्वी। पृथ्वी।

मही। रिपः। अदितिः। इला। निरृतिः। गातुः। भूः। भूमिः। पूषा। गोत्रेति पृथिव्याः॥ २१॥ १॥ हेम। चन्द्रम्। रुक्मम्।

अयः। हिरण्यम्। पेशः। कृशनम्। लोहम्। कनकम्। काञ्चनम्। भर्म। अमृतम्। मरुत्। दत्रम्। जातरूपमिति हिर

ण्यस्य॥ १५॥ २॥ अम्बरम्। वियत्। व्योम। बर्हिः। धन्व। अन्तरिक्षम्। आकाशम्। आपः। पृथिवी। भूः। स्वयम्भूः। अध्वा।

पुष्करम्। सगरम्। समुद्रः। अध्वरमित्यन्तरिक्षस्य॥ १६॥ ३॥ स्वः। पृश्निः। नाकः। गौः। विष्टप्। नभ इति साधारणानि॥ ६।

॥ ४॥ स्वेदयः। किरणाः। गावः। रश्मयः। अभीशवः। दीधितयः। गभस्तयः। वनम्। उस्राः। वसवः। मरीचिपाः। मयू

१० खाः। सप्तऋषयः। साध्याः। सुपर्णा इति रश्मीनाम॥ १५॥ ५॥ आताः। आशाः। उपराः। आष्ठाः। काष्ठाः। व्योम। क

रवाः

कुभः। हरित इति दिङ्नाम॥८॥६॥ श्यावी। क्षपा। शर्वरी। अक्तुः। ऊर्म्या। रम्या। यम्या। नम्या। दोषा। नक्ता। तमः। रजः। असिक्नी।
तमस्वती। पयस्वती। घृताची। श्रीणा। मोकी। शोकी। ऊधः। पयः। हिमा। वस्वी इति रात्रेः॥२३॥७॥ विभावरी। सूनरी। भास्व-
ती। ओदती। चित्रामघा। अर्जुनी। वाजिनी। वाजिनीवती। सुम्नावती। अहना। द्योतना। श्वेत्या। अरुषी। सूनृता। सूनृता-
वती। सूनृतावरी इत्युषसः॥१६॥८॥ वस्तोः। द्युः। भानुः। वासरम्। स्वसराणि। घ्रंसः। घर्मः। घृणिः। दिनम्। दिवा। दि-
वेदिवे। द्यविद्यवी इत्यह्नः॥१२॥९॥ अद्रिः। ग्रावा। गोत्रः। वलः। अश्नः। पुरुभोजाः। वलिशानः। अश्मा। पर्वतः। गिरिः। व्रजः। गौरिः ५
चरुः। वराहः। शम्बरः। रौहिणः। रैवतः। फलिगः। उपरः। उपलः। चमसः। अहिः। अभ्रम्। वलाहकः। मेघः। दृतिः।
ओदनम्। वृषन्धिः। वृत्रः। असुरः। कोश इति मेघानाम॥३०॥१०॥ श्लोकः। धारा। इळा। गौः। गौरी। गान्धर्वी। गभीरा।
गंभीरा। मन्द्रा। मन्द्राजनी। वाशी। वाणी। वाणीची। वाणः। पविः। भारती। धमनिः। नालिः। मेलिः। मेना। सूर्या। सरस्वती।
निवित्। स्वाहा। वग्नुः। उपब्दिः। मायुः। काकुत्। जिह्वा। घोषः। स्वरः। शब्दः। स्वनः। ऋक्। होत्रा। गीः। गाथा। गणः।

म्मा

धेना। ग्ना। विपा। नना। कशा। धिषणा। नौः। अक्षरम्। मही। अदितिः। शची। वाक्। अनुष्टुप्। धेनुः। वल्गुः। गल्दा। सरः। सु
पर्णी। बेकुरा इति वाचः ॥५७॥ अर्णः। क्षोदः। क्षद्म। नभः। अम्भः। कबन्धम्। सलिलम्। वाः। वनम्। घृतम्। मधु। पुरीषम्।
पिप्पलम्। क्षीरम्। विषम्। रेतः। कशः। जन्म। बृबूकम्। बुसम्। तुग्र्या। बुर्बुरः। सुक्षेम। धरुणम्। सुरा। अररिं
दानि। ध्वस्मान्वत्। जामिः। आयुधानि। क्षपः। अहिः। अक्षरम्। स्रोतांसि। तृप्तिः। रसः। उदकम्। पयः। सरः। भेषजम्।
५ नुः सहः। शवः। ओजः। सुखम्। क्षत्रम्। आवयाः। शुभम्। यादः। भूतम्। भुवनम्। भविष्यत्। आपः। महत्। व्योम। य
शः शः। महः। सर्णीकम्। स्वृतीकम्। सतीनम्। गहनम्। गभीरम्। गम्भरम्। अन्नम्। हविः। सद्म। स ईम्।
दनम्। ऋतम्। योनिः। ऋतस्य योनिः। सत्यम्। नीरम्। रयिः। सत्। पूर्णम्। सर्वम्। अक्षितम्। बर्हिः। नाम। सर्पिः।
अपः। पवित्रम्। अमृतम्। इन्दुः। हेम। स्वः। सर्गाः। शम्बरम्। अभ्वम्। वपुः। अम्बु। तोयम्। कृपीटम्। शुक्रम्। तेजः।
स्वधा। अक्षरम्। वारि। जलम्। जलाषम्। इदमित्युदकस्य॥१०१॥ अवनयः। यव्याः। खाः। सीराः। स्रोत्याः।

तूयम्२

दधिक्रा ३ ख: ४ २२

एन्यः। धुनयः। रुजानाः। वक्षणाः। खादोअर्णाः। रोधचक्राः। हरितः। सरितः। अग्रुवः। नभन्वाः। वध्वः। हिरण्यवर्णाः। रोहितः।
सस्रुतः। अर्णाः। सिंधवः। कुल्याः। वर्यः। उर्व्यः। इरावत्यः। पार्वत्यः। स्रवन्त्यः। ऊर्जस्वत्यः। पयस्वत्यः। तरस्वत्यः।
सरस्वत्यः। हरस्वत्यः। रोधस्वत्यः। भास्वत्यः। अजिराः। मातरः। नद्य इति नदीनाम॥ ३७॥ १३॥ अत्यः। हयः। अर्वा।
वाजी। सप्तिः। वह्निः। दधिक्राः। दधिक्रावा। एतग्वः। पैद्वः। दौर्गहः। उच्चैःश्रवसः। तार्क्ष्यः। आशुः। ब्रध्नः। अरुषः। मांश्चत्वः।
अ अव्यथयः। श्येनासः। सुपर्णाः। पतङ्गाः। नरः। ह्वार्याणाम्। हंसासः। अश्वा इत्यश्वानाम्॥ २६॥ १४॥ हरी इन्द्र
स्य। रोहितोऽग्नेः। हरित आदित्यस्य। रासभावश्विनोः। अजाः पूष्णः। पृषत्यो मरुताम्। अरुण्यो गाव उषसाम्। श्या
वाः सवितुः। विश्वरूपा बृहस्पतेः। नियुतो वायोः। इत्यादिष्टोपयोजनानि॥ १॥ १५॥ भ्राजते। भ्राशते। भ्लाशते। दी
प्यति। शोचति। मन्दते। भन्दते। रोचते। ज्योतते। द्योतते। द्युमदिति ज्वलतिकर्माणः॥ ११॥ १६॥ जमत्। कल्मलीकिनम्।
जंजणाभवत्। मल्मलाभवत्। अर्चिः। शोचिः। तपः। तेजः। हरः। हृणिः। शृङ्गाणीति ज्वलतः॥ ११॥ १७॥ इति चतुर्थ

धव: ४ श्री। धी: क ३

ध्यायः॥४॥ ॥ ओं अपः। अप्नः। दंसः। वेषः। वेपः। विष्ट्वी। व्रतम्। कर्वरम्। करणम्। शक्म। क्रतुः। करणानि। करांसि।
करिक्रत्। करन्ति। चक्रत्। कर्त्वम्। कर्तोः। कर्तवै। कृत्वी। धावी। शमी। शिमी। शक्तिः। शिल्पमिति कर्मणः॥२६॥१॥ तुक्।
२।३ तोकम्। तनयम्। तोक्म। तक्म। शेषः। अप्नः। गयः। जाः। अपत्यम्। यहुः। सूनुः। नपात्। प्रजा। बीजमित्यपत्यस्य॥१॥२॥
१० मनुष्याः। नरः। नरः। जन्तवः। विशः। क्षितयः। कृष्टयः। चर्षणयः। नहुषः। हरयः। मर्याः। मर्त्याः। मर्ताः। व्राताः। तु
र्वशाः। द्रुह्यवः। आयवः। यदवः। अनवः। पूरवः। जगतः। तस्थुषः। पञ्चजनाः। विवस्वन्तः। पृतना इति मनुष्याणाम्॥
२५॥३॥ आयती। च्यवाना। अभीशू। अप्नवाना। विनंगृसौ। गभस्ती। करस्नौ। बाहू। भुरिजौ। क्षिपस्ती। शक्वरी। राम: १०:
भद्रि त्रिमित्वा दृशौ॥१२॥४॥ अणुवः। अत्वेः। क्षिपः। विशः। शर्याः। रशनाः। धीतयः। अथर्यः। विपः। कक्ष्याः।
अवनयः। हरितः। रोहितः। स्वसारः। जामयः। सनाभयः। योक्त्राणि। योजनानि। धुरः। शाखाः। अभीशवः।
दीधित गभस्तयः इत्यङ्गुलीनाम्॥२२॥५॥ वश्मि। उश्मसि। अवकेति। वेति। वनति। वसति। वांछति। वष्टि। वनोति। जुषते।

न

हर्यति। उश्मात्। मन्यते। श्रीसतेन्। चाकनत्। वक्रमानः। कनति। का निषदिति कान्तिकर्माणः॥ २।६॥ अन्धः। वाजः। पाजः।
पयः। पृक्षः। पितुः। सुतम्। सिनम्। अवः। क्षुत्। धासि। इरा। इला। इषम्। ऊर्क्। रसः। स्वधा। अर्कः। वयः। क्षद्म। नेमः।
ससम्। नमः। आयुः। सूनृता। ब्रह्म। वर्चः। कीलालमित्यन्नस्य॥ २।७॥ आवयति। भर्वति। बभस्ति। वेति। विवेष्टि।
अविष्यत्। बप्सति। भसथः। बब्धाम्। इत्यत्तिकर्माणः॥ २।८॥ ओजः। पाजः। शवः। तवः। तरः। त्वक्षः। शर्द्धः।
बाधः। नृम्णम्। तविषी। शुष्मम्। उल्बम्। दक्षः। वीलु। च्यौत्नम्। शूषम्। सहः। यहः। बधः। वर्गः। वृजनम्। वृक्। मज्म
ना। पौंस्यानि। धर्णसि। द्रविणम्। स्यंद्रासः। प्रावरमिति बलस्य॥ २।९॥ मघम्। रिक्णः। रिक्थम्। वेदः। वरिवः। श्वात्रम्।
रत्नम्। रयिः। क्षत्रम्। भगः। मीळ्हुम्। गयः। नृम्णम्। द्युम्नम्। इन्द्रियम्। वसु। रायः। राधः। भोजनम्। तनाम्। बंधु। मे
धा। यशः। ब्रह्म। द्रविणम्। श्रवः। वित्तम्। ऋतमिति धनस्य॥ २।१०॥ अघ्न्या। उस्रा। उस्रिया। अही। मही। अदि
तिः। इला। जगती। शक्वरीति गवाम्॥ २।११॥ रेळते। हेळते। भामते। भ्रणीयते। श्रीणाति। सूपर्णा। दोधति। वनुष्यति।

कम्यते। भोजत इति क्रुध्यतिकर्माणि॥ २।१२॥ हेलः। हुरः। ह्रुणिः। त्यजः। भामः। एहः। वरः। तप्सुषी। जूर्णिः। मन्युः।
व्यथिरिति क्रोधस्य॥ २।१३॥ वर्त्तते। अयते। लायते। लोठते। स्यन्दति। कसति। सर्पति। स्यमति। स्रवति।
स्रंसति। श्वोतति। ध्वंसति। वेनति। मार्ष्टि। भुरण्यति। शवति। कालयति। पेलयति। कंटति। पिस्पति। वि
स्पति। मिस्यति। प्रवते। प्लवते। च्यवते। कवते। गवते। अवते। क्षोदति। सकति। इयक्षति। मियक्षति। स
यति। अवति। कम्यति। तुरीयति। स्सरति। अतति। पतति। यतति। सश्चति। रहति। भ्रमति। ध्रुजति। ध्रज
ति। ऋञ्जति। क्रियति। किणोति। ऋणवति। शिसर्ति। वेधि। हि। आपिप्रीहि। ऋणोति। कृणोति। इयर्ति। ई
येते। नदति। नखति। दभ्यति। दध्राति। धुध्यते। धन्वति। अरर्षति। अलर्षति। डीयते। तकति। दीय राम:
ति। इयक्षि। फणति। सघाति। क्लिप्यति। धवति। धावति। हम्यति। हयति। दूते। जयति। श्रावति। गन्ति ११
गनीगन्ति। जगाति। जंगाति। जगाति। गमति। मिनाति। ध्राति। ध्राति। अयति। ध्रुवति। वल्गूयति। अय

र्यक्षति। ह्वलते। जेहति। वदति। गाति। स्रूद्धसि। एजति। वञ्चति। षष्कति। ष्वष्कति। तुम्पति। स्नाति। वाति। याति।
जायति। पतयति। पवते। हन्ति। सेधति। अगन्। अजगन्। आगनीगन्ति। गाति। जिगाति। इन्वति। ध्रजति। जवति।
ड्रुमति। वेति। हयन्त। जगायात्। अयुधुरिति गतिकर्माणः॥१२२।१४॥ नु। मक्षु। द्रवत्। उग्रम्। जीरा। जूर्णिः।
शूर्तीः। शूघनाः। शीभम्। तृषु। तूर्यम्। तूर्णिः। अजिरम्। भुरण्युः। शु। आशुः। प्राशु। जित्। तूतुजानः। तु-
तुजिः। तूतुजानासः। अज्राः। साचीवत्। द्युगत्। ताजत्। तरणिः। वातरंहा इति क्षिप्रस्य॥२६।१५॥ तलित्।
आसात्। अम्बरम्। तुर्वशे। अस्तमीके। आके। उपाके। अर्वाके। अन्तमानाम्। अवमे। उपमे इत्यन्तिकस्य॥११।१६॥
रणः। विवाक्। नदनुः। विखादः। भरे। आक्रन्दे। आहवे। आजौ। पृतनाज्यम्। अभीके। समीके। ममसत्ये। नेमधि-
तिः। संकाः। समितिः। समनम्। मीळ्हे। पृतनाः। स्पृधः। मृधः। पृत्सुधः। समत्सु। समरणे। समोहे। संखे। संगे। सं-
युगे। समर्ये। हत्रतूर्ये। पृक्षे। आणौ। प्रधने। शूरसातौ। वाजसातौ। समनीके। खले। खजे। पौंस्ये। महाधने। वाजे।

आगमन्। सम्मन्। समिथे। संगथे। संयतः। संवत इति संग्रामस्य॥ ४।१७॥ इन्वति। ननक्षतु। आकाणः। आनट्। आ
ष्टः। आपानम्। आनशे। अश्नात्। नशात्। अश्नुत इति व्याप्तिकर्माणः॥ २।१८॥ दभ्नोति। श्नथति। श्रथति। धूर्वति। ध्वर्व
ति। हणेति। ध्वयति। कणेति। कन्नति। श्वसति। नभति। अर्दति। मर्दति। स्नेहति। यातयति। स्फुरति। स्फुलति। निव
पतु। अवतिरति। वियातः। आतिरत्। तलित्। आखण्डलः। दूणाति। शृणाति। मिनाति। जिनक्लि। ताक्लि। मि
तोष्पयति। निवर्हयति। मिनोति। जूर्वति। धमतीति वधकर्माणः॥ ३।१९॥ दिद्युत्। नेमिः। हेतिः। नमः। पविः।
वज्रः। सृकाः। वृकः। वधः। अर्कः। कुत्सः। मेनिः। कुलिशः। तुंजः। तिग्मः। स्वधितिः। सायकः। परशुरिति व
ज्रस्य॥ २।२०॥ इरज्यति। पत्यते। क्षियति। राजतीत्यैश्वर्यकर्माणः॥ ४।२१॥ राष्ट्री। अर्यः। नियुत्वान्। इन इतीश्व नाम॰
रस्य॥ ४।२२॥ ॥इति पञ्चमोऽध्यायः॥५॥ ॥ॐ १३ क॥ ॐ विपुरु भुरि। शश्वत्। विश्वम्। परीव्यानशिः। श १२
तम्। सहस्रम्। सलिलम्। कुविदिति बहोः॥ १।१॥ ऋंहत्। ह्रस्वः। निघृष्वः। विषमः। मायुकः। प्रतिष्ठा। कृधुकः।

वंम्रकः। दहरकः। अर्भकः। अल्पकमितिह्रस्वस्य॥११॥२॥ महत्। बध्नः। ऋ बृहत्। उक्षः। उक्षितः। महिकः। अभ्वः। त
वसः। तविषः। ऋभुक्षाः। उक्षाः। विहायाः। यह्वः। ववक्षिथ। विवक्षसे। अंभृणः। गम्भीरः। माहिनः। ककुहक्षिमा।
रभसः। व्राधम्। विरप्शी। अद्भुतः। बर्हिष्ठः। बर्हिषीतिमहतः॥२५॥३॥ गयः। कृदरः। गर्तः। हर्म्यम्। नीडम्।
अस्तम्। पस्त्यम्। दुरोणे। दुर्याः। स्वसराणि। अमा। दमे। कृत्तिः। योनिः। शर्म। शरणम्। वरूथम्। छर्दिः। छदिः।
छाया। वर्म। अजमेतिगृहाणाम्॥२२॥४॥ इरस्यति। विधेम। सपर्यति। नमस्यति। दुवस्यति। ऋध्नोति। ऋणद्धि।
ऋच्छति। शपति। विवासतीतिपरिचरणकर्माणः॥१०॥५॥ शिंबाता। शतरा। शातपन्ता। शिल्गु। शेवृधम्। स्यूम
कम्। मयः। सुम्नम्। सुदिनम्। शूषम्। शुनम्। शर्म। भेषजम्। जलाषम्। स्योनम्। शोनम्। शिवम्। शग्मम्। कदि
तिसुखस्य॥२०॥६॥ निर्णिक्। वव्रिः। वर्पः। वपुः। अप्सुः। अमतिः। अप्सः। वप्सः। पिष्टम्। पेशः। कृशनम्। भरुत्। अ
र्जुनम्। ताम्रम्। अरुषम्। शिल्पमितिरूपस्य॥१६॥७॥ असेमामम्। अनेद्यः। अनिंद्यः। अनभिशस्तिः। अनवद्यः।

उक्थ्यः । सुनीथ । पाकः । वामः । वयुनमिति प्रशस्यस्य ॥१०॥८॥ केतः । केतुः । चेतः । चित्तम् । क्रतुः । असुः । धीः । शची । माया ।
वयुनम् । अभिख्येति प्रज्ञायाः ॥११॥९॥ बट् । श्रत् । सत्रा । इत्था । अद्धा । ऋतमिति सत्यस्य ॥६॥१०॥ चिक्युम् । चक्न । चाख्म ।
चष्टे । विचष्टे । विचर्षणिः । विश्वचर्षणिः । अवचाकशदिति पश्यतिकर्माणः ॥८॥११॥ हिकम् । सुखम् । नुकम् । आ
13 किम् । नकिम् । नकिः । माहिम् । माकिः । आकृतमित्या मिश्राणि ॥९॥१२॥ इदमिव । इदंयथा । अग्निर्न ये । चतुर्भिर्द
दमानात् । ब्राह्मणा व्रतचारिणः । वृक्षस्य नु ते पुरुहूतवयाः । जारआभगम् । मेषो भूतोऽभियन्नयः । तद्रूपः । तद्वर्णः । त
द्वत् । तथोपमा ॥१२॥१३॥ अर्चति । गायति । रेभति । स्तोभति । गूर्धयति । गृणाति । जरते । ह्वयति । रिहति । धम
ति । नदति । पृच्छति । कृपा । कृपण्यति । पनस्यति । पणायते । वल्गूयति । मन्दते । छन्दति । छदयति । शशमानः । रज नाम:
यति । रंजति । शंसति । स्तौति । यौति । रौति । नौति । भन्दते । भणति । भणायते । स्वपिति । विप्रिदाः । महयति । वाजयति । १३
पूजयति । स्वदति । मदति । रसति । वेनति । कल्पते । जल्पति । मन्त्रयते । वन्दते इत्यर्चतिकर्माणः ॥४४॥१४॥ विप्रः ।

विग्रः। गृत्सः। धीरः। वेनः। वेधः। कण्वः। ऋभुः। नवेदाः। कविः। मनीषी। मन्धाता। विधाता। मनश्चित्। विपश्चित्।
विपन्युः। आकेनिपः। केनिपः। उशिजः। कीस्तासः। अद्धातयः। मतयः। मतुथाः। मेधाविन इति मेधाविनाम्॥
॥२४॥१५॥ रेभः। जरिता। कारुः। कीरिः। स्तामुः। सूरिः। रुद्रः। नदः। नादः। छन्दः। स्तुप्। गौः। कृपण्युरिति स्तोतृणाम्।
॥१३॥१६॥ यज्ञः। वेनः। मेधः। नार्यो। अध्वरः। विदथः। सवनम्। होत्रा। इष्टिः। देवता। मखः। विष्णुः। इन्दुः। प्रजापतिः।
घर्म इति यज्ञस्य॥१५॥१७॥ भरताः। कुरवः। वाघतः। वृक्तबर्हिषः। सबाधः। यतस्रुचः। मरुतः। देवय इत्यृत्वि
जाम्॥८॥१८॥ ईमहे। यामि। मन्महे। दद्धि। शग्धि। पूर्द्धि। दिदीहि। मिमीहि। दिदीढि। मिमीढि। पीपरत्। यन्तारः।
यन्ति। इषुध्यति। मदेमहि। मनामहे। मायत इति याच्ञाकर्माणः॥१७॥१९॥ दाति। दाशति। दासति। राति। रासति।
पृणक्ति। प्रीणाति। शिक्षति। तुञ्जति। मंहत इति दानकर्माणः॥१०॥२०॥ पतिस्तवः। आपधी। आधीष इत्यध्येषणा
कर्माणः॥४॥२१॥ स्वपिति। सस्तीति द्वौ स्वपितिकर्माणौ॥२॥२२॥ वव्रः। काटः। खातुः। स्वातः। अवटः। अवतः। क्रिविः।

कायः । स्रदः । उत्सः । ऋष्यदात् । कारोतरः । कुशयः । केवट इति कूपस्य ॥ १८।२३॥ त्रिपुः । रिपुः । तक्का । त्रिक्का । रिक्का ।
रिक्का तायुः । तस्करः । वनर्गुः । हुरश्चित् । मुषीवान् । मलिम्लुचः । अघशंसः । वृक इति स्तेनस्य ॥ १८।२४॥ निण्यम् ।
सस्वः । सनुतः । हिरुक् । प्रतीच्यम् । अपीच्यम् इति निर्णीतान्तर्हितनामधेयानि ॥ ६।२५॥ आके । पराके । पराचैः । आरे ।
परावत इति दूरस्य ॥ ६।२६॥ प्रत्नम् । प्रदिवः । प्रवयाः । सनेमि । पूर्व्यम् । अह्नाय इति पुराणस्य ॥ ६।२७॥ नवम् । नू
त्नम् । नूतनम् । नव्यम् । इदा । इदानीम् इति नवस्य ॥ ६।२८॥ प्रपित्वे । अभीके । दभ्रम् । अर्भकम् । तिरः । सतः । त्वः । नेमः ।
ऋक्ताः । स्तृभिः । वम्रीभिः । उपजिह्विका । उर्दरम् । कदरम् । रंभः । पिनाकम् । मेना । ग्नाः । शेपः । वैतसः । अया ।
एना । सिषक्ति । सचते । भ्यसते । रेजत इति द्विषः ॥ २५।२९॥ सधे । पुरन्धी । धिषणे । रोदसी । रोधसी । क्षोणी । अं
भसी । रजसी । सदसी । सद्मनी । घृतवती । बहुले । गभीरे । उस्प्यौ । नप्त्र्यौ । चम्वौ । पार्थ्वौ । मही । उर्वी । बृहती । दूरे राम: २८
अन्ते । अपारे । अपारे । इति द्यावापृथिव्योः ॥ २८।३०॥ ॥ इति षष्ठोध्यायः ॥६॥ ॥ जहा । निध्रा । शिशीतम

मेहना। दमूना। मूषः। इषिरः। कुरुतन। जठरे। तितउ। शिप्रे। मघवा। मन्दू। ईमान्तासः। कायमाना। लोधम्। शीरम्। विड्
वे। दुपदे। तुग्वनि। नांससे। नधस्थः। आहनसः। अद्मसत्। इष्मिणः। वाहः। परितक्म्याः। सुविते। दयते। नूचित्।
दावने। अकूपारस्य। शिशीते। सुतुकः। सुप्रायणाः। अप्रायुवः। च्यवनः। रजः। हरः। जुहुरे। व्यन्तः। क्राणाः। वाश्री॥
विषुणः। जामिः। पिता। शंयोः। अदितिः। पदिम। जसुरिः। जरते। मन्दिने। गोः। गातुः। दंसयः। तूताव। चयते। कधप्रि।
अम्याः। अस्य॥ ४।१।२॥ सस्निम्। वाहिष्ठः। वावशानः। वार्यम्। अन्धः। असश्चती। वनुष्यति। तरुष्यति। भंदनाः
आहनः। नदः। सोमो अक्षाः। श्वात्रम्। ऊतिः। हासमाने। घड्विः। समम्। द्विता। व्राः। वराहः। स्वसराणि। शर्याः। अ
र्कः। पविः। वक्षः। धन्व। सिनम्। इत्था। सचा। चित्। आ। द्युम्नम्। पवित्रम्। तोदः। स्वञ्चाः। शिपिविष्टः। विष्णुः। आघृ
णिः। पृथुज्रयाः। अथर्युम्। काणुका। अध्रिगुः। आंगूषः। आपान्तमन्युः। श्मशा। उर्वशी। उर्वशी। वयुनम्। वा
जपस्त्यम्। वाजगन्ध्यम्। गध्यम्। गध्यतिः। कौरयाणः। तौरयाणः। अह्रयाणः। हर्याणः। आरितः। व्रंदिनः। नध्वपी॥

नु। लीधाम्। त्सुंपम्। निर्वृष्टणेन। पदिम्। पाडुः। हकः। जोषवाकम्। छान्तिः। स्वघ्नी। समस्य। कुठस्य। वर्षीणिः। घ्रांकः। के
पयः। नूतुमाह्वये। अंसत्रम्। काकुदम्। वीळिते। अच्छ। पति। ईंसी। एनम्। एनाम्। सत्रीणिः॥ ७।१।२॥ आशुदालिः।
आधाभ्यः। काधीः। कुणम्। अलातृणः। सललूकम्। कत्पयम्। विस्रुहः। वीरुधः। नदाद्धाभम्। अस्कोधायुः।
निश्रंभाः। दवृद्धकम्। रुद्रधरः। रुद्रपः। प्रलुकामः। असिन्वती। कपना। नारुजीकः। रुजानाः। जूर्णिः। ओ
मना। उपलप्रक्षिणी। उपसि। कलविकः। अभ्यर्धयज्वा। ईक्षे। जोणस्य। अस्मे। पाथः। सवीमनि। सप्रथाः। विद
थानि। श्रायन्तः। आघ्रीः। अजीगः। अमूरः। प्राप्यमानः। देवोदेवाच्याकृपा। विजामातुः। उभासः। सोमानम्। अनप
यम्। किमीदिने। अमः। अमीवा। दुरितम्। अधा। अमतिः। सुष्टी। पुरंधिः। रुप्रात्। द्विपादसः। सुदत्रः। सुवि
दत्रः। आनुषक्। तुर्वणिः। गिर्वणसे। अस्तृतैस्तृतैः। अभ्यक्। धाहृष्मिमन्। जाव्याधि। अग्रिया। वनः। पव
ता। वरुथः। अमिनः। जञ्जतीः। अप्रतिष्कुतः। प्राप्यादानः॥ ७।१।३॥ रूप्रः। सुशिप्रः। शिप्रे। रंसु। द्विर्बर्हाः।

रामः
१५

15

अक्रः । उराणः । स्त्रियानाम् । क्षिपाः । जवाक । अरूप्यम् । कुलिशः । तुंजः । वर्हणा । ततनुष्टिम् । इलीविशः । कियेधाः
भृमिः । विष्पितः । तुरीयम् । रास्पिनः । ऋंजती । प्रतद्वसू । हिनोत । चोष्कूयमाणः । चोष्कूयते । सुमत् । दिविष्टिषु । दूतः ।
जिन्वति । अमत्रः । ऋचीषमः । अनर्शरातिः । अनवी । असामि । गल्दया । गल्दः । बकुरः । बेकनाटान् । अभिधेतन ।
अंहुरः । बतः । वाताप्यम् । चाकन् । रथर्यति । असक्राम् । आधवः । अनवब्रवः । सदान्वे । पराशरः । किविर्दती ।
करूलती । दनः । शरारुः । इदंयुः । कीकटेषु । बुंदः । वृदम् । किः । उल्बम् । ऋबीसम् । बीजम् ॥ ३।४ ॥ ॥ इति स
प्तमोध्यायः ॥ ७ ॥ ॥ अग्न । अग्निः । जातवेदाः । वैश्वानरः । द्रविणोदाः । इध्मः । तनूनपात् । नराशंसः । इळः । बर्हिः ।
द्वारः । उषासानक्ता । दैव्याहोतारा । तिस्रोदेवीः । त्वष्टा । वनस्पतिः । स्वाहाकृतयः ॥ ५।१ ॥ अश्वः । शकुनिः । मंडूकाः ।
अक्षाः । ग्रावाणः । नाराशंसः । रथः । दुंदुभिः । इषुधिः । हस्तघ्नः । अभीशवः । धनुः । ज्या । इषुः । अश्वाजनि । उलू
खलम् । वृषभः । द्रुघणः । पितुम् । नद्यः । आपः । ओषधयः । रात्रिः । अरण्यानी । श्रद्धा । पृथिवी । अप्वा । अग्नायी ।

उलूखलमुसले। हविर्धाने। द्यावापृथिव्यापृथिव्यौ। विपाट्छुतुद्र्यौ। आर्त्नी। शुनासीरौ। देवीजोष्ट्री। देवीऊर्जाहु
ती॥ ५।२॥ वायुः। वरुणः। रुद्रः। इन्द्रः। पर्जन्यः। बृहस्पतिः। ब्रह्मणस्पतिः। क्षेत्रस्यपतिः। वास्तोष्पतिः। वाचस्पतिः।
अपांनपात्। यमः। मित्रः। कः। सरस्वान्। विश्वकर्मा। तार्क्ष्यः। मन्युः। दधिक्राः। सविता। त्वष्टा। वातः। अग्निः।
वेनः। असुनीतिः। ऋतः। इन्दुः। प्रजापतिः। अहिः। अहिर्बुध्न्यः। सुपर्णः। पुरूरवाः॥ ५।३॥ श्येनः। सोमः। चन्द्र
माः। मृत्युः। विश्वानरः। धाता। विधाता॥ मरुतः। रुद्राः। ऋभवः। अंगिरसः। पितरः। अथर्वाणः। भृगवः।
ऋषयः। आप्त्या। अदितिः। सरमा। सरस्वती। वाक्। अनुमतिः। राका। सिनीवाली। कुहूः। यमी। उर्वशी। पृथि
वी। इन्द्राणी। गौरी। गौः। धेनुः। अघ्न्या। पथ्या। स्वस्तिः॥ उषा। इळा। रोदसी॥ ५।४॥ अश्विनौ। उषाः। सूर्या।
वृषाकपायी। सरण्युः। त्वष्टा। सविता। भगः। सूर्यः। पूषा। विष्णुः। विश्वानरः। वरुणः। केशी। केशिनः। वृ
षाकपिः। यमः। अजएकपात्। पृथिवी। समुद्रः। अपवा। मनुः। दध्यङ्। आदित्याः। सप्तऋषयः। देवाः।

राम:
१५

विश्वे देवाः। साध्याः। वसवः। वाजिनः। देवपत्न्यो देवपत्न्यः ॥ ३१ ॥ ५ ॥ ॥ इत्यष्टमोऽध्यायः समाप्तश्चायं ग्रन्थः ॥ ८ ॥
वह्नीन्दुद्विधर्मसङ्ख्ये वैक्रमेऽब्दे बुधवासरे। भगवन्तो लिखत् कौले नभसः प्रतिपत्तिथौ ॥ १ ॥ ॥ श्रीसदाशिवो जयति ॥ ॥

रामः
१८

पाणिन्यादिशिक्षाचतु ३७